# संस्कृत-वार्ता:

दिनाङ्क : 05/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् सोमनाथमन्दिरस्य गतशताधिकवर्षाणाम् अस्तित्वं देशस्य सुदृढसंस्कृतेः भावं प्रतिबिम्बयति ।
- सर्वोच्चन्यायालयेन विंशत्यधिक-द्विसहस्र तमवर्षस्य दिल्ली-प्रदर्शन-षड्यन्त्र-प्रकरणे उमर-खालिद तथा शरजील-इमाम इत्युभौ प्रतिभूतिः प्रदातुं निराकृता, पीठेन अन्यान् पञ्चाभियुक्तान् प्रकरणेऽस्मिन् प्रतिभूतिः प्रदत्ता।
- रक्षामंत्री राजनाथसिंहः अद्य गोवाराज्ये भारतीय-तटरक्षक-दलस्य प्रथमम् स्वदेशीरूपेण परिकल्पितं निर्मितं च प्रदूषणनियन्त्रणनौकायानं समुद्र-प्रतापम् अधिकृतवान्।
- विदेशमन्त्री डा. एस्. जयशङ्करः अद्य फ्रान्स् देशं सम्प्राप्तवान्। स: पैरिस्-नगरे फ़्रान्स्-देशस्य नेतृत्वेण सह मिलित्वा वार्तालापं करिष्यति।
- उत्तरप्रदेश-सर्वकारेण सद्यः एव विज्ञापितस्य यू. पी. आरक्षिबलस्य तथा पी. ए. सी. आरक्षिबलस्य नियुक्त्यै आयु-सीमायां वर्षत्रयाणां शिथिलता-दातुं निर्णयः कृतः।
- अण्डर्-19 पुरुष-क्रिकेट्-क्रीडायां, बेनोनी-नगरस्य विलोमूर्-पार्क्-इत्यत्र तिसृणां-क्रीडा-श्रृङ्खलायाः द्वितीये-युव-ओ. डि. आई.-क्रीडायां आतिथेय-दक्षिण-आफ़्रिकादलेन भारताय षड्चत्वारिंशदधिक द्विशत धवनांकानां लक्ष्यं प्रदत्तम्।

---

<u>पीएम-सोमनाथ</u>

सोमनाथमन्दिरस्य गतशताधिकवर्षाणाम् अस्तित्वं देशस्य सुदृढसंस्कृतेः भावं प्रतिबिम्बयति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। सः अवदत् यत्, पुनः पुनः आक्रमणेषु, विपदेषु च सत्सु अपि सोमनाथमन्दिरं निरन्तरं उन्नतं वर्तते। षड्विंशत्यधिकैकशततमे वर्षे जाते सोमनाथ-देवालयस्य उपरि प्रथम-आक्रमणस्य सहस्रवर्षाणां ऐतिहासिक अवसरे ओपी-एड् इत्यस्मिन् निदर्शनं कुर्वन्

प्रधानमन्त्री उक्तवान्, सोमनाथ-शब्दं श्रुत्वा जनानां हृदयेषु मनसिषु च अभिमानस्य अनुभूतिः भवति। सः अवदत् यत्, एतत् देशस्य आत्मायाः नित्यघोष: अस्ति तथा च एतत् भव्यं मन्दिरं देशस्य पश्चिमतटे गुजरातराज्ये प्रभासपाटने स्थित: अस्ति। सोमनाथ-मन्दिरस्य जीर्णोद्धारार्थं योगदानकर्तृणां प्रयत्नानां प्रशंसां कुर्वन् प्रधानमन्त्री अवदत् यत्, पुनः प्रतिष्ठापितं मन्दिरं भक्तानां कृते उद्घाटनानन्तरं षड्विंशत्यधिकद्विसहस्रतमे वर्षे पञ्चसप्तति वर्षाणि पूरयित्वा अन्यं महत्त्वपूर्णं लक्ष्यं प्राप्स्यति। प्रधानमन्त्री मोदी अवदत् यत् षड्विंशत्यधिकैकसहस्रतमे तमे वर्षे जनवरीमासे महमूदः गज़नी-इत्येषः अस्य मन्दिरस्य उपरि आक्रमणं कृतवान्, हिंसात्मकेन बर्बरेन च आक्रमणेन आस्थायाः सभ्यतायाः च महान् प्रतीकं नाशयितुं प्रयतितवान्। श्रीमोदिना दृश्य-श्रव्य-माध्यमेन उक्तं यत्, सहस्रवर्षाणाम् अनन्तरं अपि, सोमनाथस्य वैभवं पुनः स्थापयितुं असंख्य-प्रयत्नैः इदं मन्दिरं अद्यापि तथैव-वैभवयुतं वर्तते।

अत्रान्तरे, प्रधानमन्त्री नरेन्द्रमोदी रविवासरे गुजरात-स्थितस्य सोमनाथमन्दिरस्य भ्रमणं करिष्यति। एकः अधिकारी अवदत् यत् सोमनाथस्य स्वाभिमान-पर्वं स्मरणाय सोमनाथे वर्षपर्यन्तम् कार्यक्रमाणाम् आयोजनस्य योजना निर्मिता अस्ति। षड्विंशत्यधिक द्विसहस्रतमे वर्षे सोमनाथस्य उपरि प्रथमस्य आक्रमणस्य एकसहस्रवर्षाणि जातानि। सोमनाथे जनवरीमासस्य अष्टम दिनाङ्कादारभ्य एकादश दिनाङ्कपर्यन्तं नैके आध्यात्मिक-सामाजिक-कार्यक्रमाः आयोजिताः भविष्यन्ति।

---

<u>बीजेपी-सोमनाथ</u>

भाजपेति दलेन अद्य उक्तं यत् ऐतिहासिकस्य सोमनाथस्य मन्दिरस्य प्राणप्रतिष्ठा-समये प्रथमराष्ट्रपतेः डा. राजेन्द्रप्रसादस्य परिकल्पना अधुना प्रधानमन्त्रिण: नरेन्द्रमोदिनः नेतृत्वे परिपूर्णा भविष्यति। नवदिल्ल्याः दलस्य-मुख्यालये वार्ताहर-सम्मेलनं सम्बोधयन् दलस्य प्रवक्ता डा. सुधांशु त्रिवेदी अवदत् यत्, भारतं समृद्धिं प्रति गच्छन् अस्ति, अधुना देशः विश्वस्य चतस्रः बृहत्तमार्थव्यवस्था अभवत् इति।

---

## सर्वोच्च न्यायालय – उमर खालिद

सर्वोच्चन्यायालयेन विंशत्यधिक-द्विसहस्र तमवर्षस्य दिल्ली-प्रदर्शन-षड्यन्त्र-प्रकरणे उमर-खालिद तथा शरजील-इमाम इत्युभौ प्रतिभूतिः प्रदातुं निराकृता, न्यायालयेन उक्तं यत् अभियुक्तानां विरुद्धं अनलॉफुल एक्टिविटीज प्रिवेंशन एक्ट (यू. ए. पी. ए.) इत्यधिनियमस्य अन्तर्गतं प्रथमदृष्ट्या प्रकरणम् आसीत्। परन्च, न्यायाधीशः अरविन्दकुमार: तथा न्यायाधीशः एन्. वी. अञ्जारिया इत्येतयोः पीठेन अन्यान् पञ्चाभियुक्तान् गुल्फिशा फातिमा, मीरान् हैदर्, शिफा उर् रहमान्, सलीम् खान्, शादाब् अहमद् इत्येतान् प्रकरणे प्रतिभूतिः प्रदत्ता।

---

## राजनाथ-समुद्रप्रताप

रक्षामंत्री राजनाथसिंहः अद्य गोवाराज्ये भारतीय-तटरक्षक-दलस्य प्रथमम् स्वदेशीरूपेण परिकल्पितं निर्मितं च प्रदूषणनियन्त्रणनौकायानं समुद्र-प्रतापम् अधिकृतवान्। समुद्र-प्रतापस्य कार्यारंभे रक्षामन्त्रिणा देशस्य सामूहिक-संकल्पस्य, समुद्रीय-विश्वासस्य च प्रतीकरूपेण अस्य पोतस्य प्रशंसा कृतम्।

---

## जयशंकर-फ्रांस

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य फ्रान्स् देशं सम्प्राप्तवान्। सामाजिकान्तर्जालीये सन्देशे डा. जयशङ्करः अवदत् यत्, सः पैरिस-नगरे भारत-फ़्रान्स्-देशयोः मध्ये 'से क्वि से ट्रेम् वोवन् स्टोरीस्' इति प्रदर्शनीम् अपश्यत्। सः अवदत् यत्, एतत् भारतस्य वस्त्र-परम्परां, ज्ञान-वैभवं, सृजनात्मकतां च प्रदर्शयति तथा च द्वयोः देशयोः मध्ये दृढ-सांस्कृतिक-सम्बन्धस्य स्मारकं च अस्ति। स्वयात्रायाम् डा. जयशङ्करः पैरिस्-नगरे फ़्रान्स्-देशस्य नेतृत्वेण सह मिलित्वा स्व-समकक्षीयेण जीन् नोएल बैरोट् इत्यनेन सह वार्तालापं करिष्यति।

---

## उत्तरप्रदेश-आयु सीमा

उत्तरप्रदेश-सर्वकारेण सद्यः एव विज्ञापितस्य यू. पी. आरक्षिबलस्य तथा पी. ए. सी. आरक्षिबलस्य नियुक्त्यै आवेदनकर्तृभ्यः उच्च-आयु-सीमायां वर्षत्रयाणां शिथिलता-दातुं निर्णयः कृतः अस्ति। मुख्यमन्त्री योगी आदित्यनाथस्य निर्देशानुसारं, यू. पी. नागरिक-आरक्षकाणां समतुल्यस्थानानां च प्रस्तावित-प्रत्यक्ष-नियुक्त्यै पञ्चविंशत्यधिक द्विसहस्रतम वर्षपर्यन्तं अधिकतम-आयु-सीमायां एकवारं त्रिवर्षाणां शिथिलता-प्रदातुं निर्णयः कृतः अस्ति। प्रत्यक्ष-नियुक्ति-पञ्चविंशत्यधिक द्विसहस्रतम इत्यस्य अन्तर्गतं आहत्य ऊनाशीत्यधिक-षट्शतोत्तर-द्वात्रिंशत्सहस्र-पदानि पूर्यन्ते।

------------------------------------------

## शिवराज जी राम जी

कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज्-सिङ्घ्-चौहानेन उक्तं यत्, पूर्वतनस्य मनरेगा-योजनायाः तुलनयां पारदर्शिता वर्धयितुं विकसितभारत-रोजगारस्य प्रत्याभूतिः तथा जीविका-मिशन् (ग्रामीण्) विकसितभारत्-जी. राम जी. अधिनियमः प्रवर्तितः अस्ति। अद्य तमिल्नाडु-राज्यस्य इरोड-नगरे कृषकान् सम्बोधयन् मन्त्री अवदत् यत्, एषा योजना लाभार्थीनां कृते पूर्वतनस्य शत दिवसात् पञ्चविंशत्यधिकैकशत दिवसानां वेतन-वृत्यावसरस्य प्रत्याभूतिं करोति।

------------------------------------------

## यूएनएससी-वेनेजुएला

वेनेजुएला-देशे अमरीकादेशस्य कार्याचरणेषु चर्चयितुं अद्य संयुक्तराष्ट्रसङ्घस्य सुरक्षा-परिषदः आपदुपवेशनम् आयोजयिष्यति। परिषद: अस्थायीसदस्यस्य कोलम्बिया-देशस्य आग्रहणानन्तरं एषा सभा आहूता, स्थायीसदस्याभ्यां चीन-रशिया-देशाभ्यां च समर्थिता अस्ति। संयुक्तराष्ट्रसङ्घस्य महासचिवः वेनेजुएला-देशे अमरीकादेशस्य सैन्य-कार्याचरणं, यस्य परिणामेन राष्ट्रपतिः निकोलस मदुरो इत्येषः गृहीतः, तत् असंवैधानिकम् इति वर्णितवान्। एकस्मिन् वक्तव्ये, संयुक्तराष्ट्रसङ्घस्य प्रवक्ता स्टीफ़न् दुजारिक इत्येषः अवदत् यत्

अन्ताराष्ट्रियविधिनां नियमानाम् च अनादरेण महासचिवः एन्टोनियो गुटेरेसः अतीव चिन्तितः अस्ति इति।

------------------------------------------

<u>क्रिकेट-अंडर-19</u>

अण्डर्-19 पुरुष-क्रिकेट्-क्रीडायां, बेनोनी-नगरस्य विलोमूर्-पार्क्-इत्यत्र तिसृणां-क्रीडा-श्रृङ्खलायाः द्वितीये-युव-ओ. डि. आई.-क्रीडायां आतिथेय-दक्षिण-आफ़्रिकादलेन भारताय षड्चत्वारिंशदधिक-द्विशत-धवनांकानां लक्ष्यं प्रदत्तम्। अवधेयम् यत् दक्षिणाफ्रिका-दलेन पणकं विजित्य प्रथमं क्रीडनं चितम्।

इति वार्ता।